# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

### ०१५ – शून्यपरिकर्माष्टकम्

२७ - १२ -२०१८

# गतकक्ष्यायाम् ...

❖ भिन्नपरिकर्माष्टकम्

# अस्यां कक्ष्यायाम् ...

- शून्यपरिकर्माष्टकम्

# शून्यपरिकर्माष्टकम्

योगे खं क्षेपसमं वर्गादौ खं खभाजितो राशिः ।
खहरः स्यात्खगुणः खं खगुणश्चिन्त्यश्च शेषविधौ ।।

शून्ये गुणके जाते खं हारश्चेत् पुनस्तदा राशिः ।
अविकृत एव ज्ञेयस्तथैव खेनोनितश्च युतः ।।

अन्वयः - खं योगे क्षेपसमं, वर्गादौ खं, राशिः खभाजितो खहरः, खगुणः राशिः खं, शेषविधौ खगुणश्चिन्त्यः । शून्ये गुणके जाते पुनः खं हारः चेत् , तदा राशिः अविकृत एव ज्ञेयः । तथैव खेन ऊनितः च युतः (च अविकृतः एव ज्ञेयः) ।

- योगे खं क्षेपसमम् -

  ० + य = य

- वर्गादौ खम्

  वर्गः = ०,  वर्गमूलम् = ०

  घनः = ०, घनमूलम् = ०

- खभाजितो राशिः खहरः
- खगुणः खं स्यात्

  य x ० = ०

- खगुणः चिन्त्यः शेषविधौ

द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरं ।। १.२.१६७ ।।

नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम् ।। १.२.१६८ ।।

वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी ।। १.२.१६९ ।।

विहासयोऽपि नाकोऽपि द्युरपि स्यात्तदव्ययम् ।। १.२.१७० ।।

तारापथोऽन्तरिक्षं च मेघाध्वा च महाबिलम् ।। १.२.१७१ ।।

विहायाः शकुने पुंसि गगने पुंनपुंसकम् ।। १.२.१७२ ।।

(अमरकोषः)

बुद्धिविलासिनी -

अथैकादिस्थानस्थिताङ्कगणनाया यत्राङ्काभावस्तत्राङ्काभावद्योतनार्थं शून्यं निवेश्यते । इतरथा दशशतसहस्रादीनामभेदप्रसङ्गः । अतः शून्यस्यापि सङ्कलिताद्यष्टकसम्भवादधुना आर्याद्वयेनाह - योगे खं क्षेपसममिति । शून्ये गुणके जाते इति । शून्येन सहान्यस्य योगे प्राप्ते शून्यं क्षेपसमं स्यात् । शून्यं वर्गवर्गमूलघनघनमूलेषु शून्यमेव । खेन भाजितो राशिः खहरः स्यात् । खं हरो यस्येति खहरः । अस्य राशेरियत्ता कर्तुं न शक्यते । यतोऽसौ राशिः केनचिद्युक्तो हीनो वा अविकृतः स्यात् । तथा हि - समच्छेदकरणेऽन्योन्यहाराभिघाते नान्यो राशिः शून्यमेव स्यात् । खहरो राशिस्तेन युक्तो हीनो वा तादृश एव । तथा च आह आचार्य एवाव्यक्ते - अस्मिन्विकारः खहरे न राशिरिति । खगुणः खमिति । खेन गुणो राशिः खं भवेत् । अत्र जीवन्मुक्तदृष्टान्तः ।

बुद्धिविलासिनी -

शून्याभ्यासवशात्खतामुपगतो राशिः पुनः खोद्धृतोऽ-

प्यावृत्तिं पुनरेव तन्मयतया न प्राक्तनीं गच्छति ।

आत्माभ्यासवशादनन्यममलं चिद्रूपमानन्ददं

प्राप्य ब्रह्मपदं न संसृतिपथं योगी गरीयानिव ।।

खगुणश्चिन्त्य इति । शेषस्य विधौ कर्तव्ये सति खगुणश्चिन्त्यः । तथा हि - राशेः शून्ये गुणके प्राप्ते तस्यान्यो विधिश्चेदस्ति तदा खगुणो राशिः खं स्यादिति न कार्यम् । किन्तु शून्यं तत्पार्श्वे गुणकस्थाने स्थाप्यमिति । ततः शेषविधाने कृते पुनः खं हरश्चेत्तदा तयोः शून्यगुणकहरयोस्तुल्यत्वेन नाशः कार्यः । नोचेत्खं हरस्तदा खगुणो राशिः खं स्यादित्याह - शून्ये गुणक इत्यादि । तथैव खेनेति । खेनोनितो युतश्च राशिस्तथैवाविकृत एवेत्यर्थः ।

अत्रोदाहरणानि वसन्ततिलकया आह - खं पञ्चयुग्भवति किमिति । अत्रापि खगुणश्चिन्त्यश्च शेषविधावित्यस्योदाहरणम् । कः खगुणो निजार्धयुक्त इत्यादि ।

# उद्देशकः -

खं पञ्चयुग्भवति किं वद खस्य वर्गम्

मूलं घनं घनपदं खगुणाश्च पञ्च ।

खेनोद्धृता दश च कः खगुणो निजार्ध-

युक्तस्त्रिभिश्च गुणितः खहृतस्त्रिषष्टिः ।।

अन्वयः - खं पञ्चयुग्भवति किम् । खस्य वर्गम् मूलं घनं घनपदं वद । खगुणाश्च पञ्च (वद) । खेनोद्धृता दश च (वद)। कः खगुणः निजार्धयुक्तः त्रिभिश्च गुणितः खहृतः त्रिषष्टिः (भवेत्) ।

# उद्देशकः -

$$\frac{(\text{य} \times 0 + \frac{1}{2}\text{य} \times 0) \times 3}{0} = 63$$

$$\frac{9\,\text{य}}{2} \times \frac{0}{0} = 63, \qquad \text{य} = 14$$

# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

## ०१५ – शून्यपरिकर्माष्टकम्

२७ - १२ -२०१८